**International Journal of Research in Social Sciences**
Vol. 10 Issue 01, January 2020
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# अर्थवदधातुरप्रत्यय: प्रातिपदिकम् इति पाणिनिसूत्रस्य लक्ष्मीटीकानुरूपं विश्लेषणम् अध्ययनञ्च

- डॉ. जयप्रकाश साहु
अतिथि-अध्यापक:
संस्कृतविभाग:
ओडिशाकेन्द्रियविश्वविद्यालय:, कोरापुट

## अर्थवदधातुरप्रत्यय: प्रादिपतिकम्[1]

धातु प्रत्ययं प्रत्ययान्तञ्च वर्जयित्वाऽर्थच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्। सूत्रेऽस्मिन् चत्वारि पदानि सन्ति— 1. 'अर्थवत्, 2. अधातु:, 3. अप्रत्यय:, 4. प्रतिपदिकम्। अधातुरित्यस्य तात्पर्यमस्ति धातुं वर्जयित्वा, अप्रत्यय: इत्यस्य तात्पर्यमस्ति प्रत्ययं वर्जयित्वा, 'अर्थवत्' इत्यस्य तात्पर्यम् अस्ति—सार्थकम्। अर्थशब्दस्तावदनेकार्थवाचक:। तथा हि—प्रयोजनवाचक:— अजितः केनार्थेन पद्मपुरं याति? निवृत्तिवाचक:—मशकार्थो धूम:। धनवाचक:—अयं जन: अर्थवान् अस्ति।

प्रयुक्तवाक्येषु क्रमश: प्रयोजन-निवृत्ति-धनार्थकोऽर्थशब्दप्रयोग: किन्त्वत्र सूत्रे अर्थशब्दोऽभिधेयार्थक:। अभिधेयस्तु प्रकारचतुष्टयं भजते-जाति-गुण-द्रव्य-क्रियारूपै:। जातिर्यथा—गौ-मनुष्यादि। गुणो यथा—शुक्ल-नील-पीतादि। द्रव्यवाचको यथा राम-कृष्णादि। क्रियावाचको यथा—पाचक-पाठकादि। अत्र सूत्रे प्रत्ययपदेन प्रत्ययान्तस्यापि ग्रहणं भवति शब्दस्वरूपमिति पदस्यात्राध्याहारो विधीयते।

अन्यटीकापेक्षया लक्ष्मीटीकाकारेण विशेषतया उद्धावितं—अर्थोऽस्यास्तीत्यर्थवत् अध्याहृतशब्दस्वरूपविशेष्यानुरोधेन नपुंसकत्वम्। यद्यपि 'अर्थो विषयार्थनयोर्धनकारणवस्तुषं अभिधेये च शब्दानां निवृत्तौ च प्रयोजने' इति कोशान्नानार्थक अर्थशब्छस्तथापि इह अभिधेयार्थक एव, अर्थवद्ग्रहणस्य निरर्थकवर्णानां प्रातिपदिकसंज्ञाव्यावृत्तिरूप- फलपरकभाष्यात्। स चार्थश्चतुर्विध: जातिर्गुण: क्रिया द्रव्यञ्चेति। गौ:, शुक्ल:, पाचक:, डित्थ:, इति क्रमेणोदाहरणम्।

तथा च अभाव-शशशृङ्गादिशब्दानां प्रातिपदिकसंज्ञा न प्राप्नोति, उक्तर्थावाचकत्वात्। न च समासत्वादुत्तरेण संज्ञा, तत्रापि अर्थवदित्यस्यानशुवृत्ते:। अन्यथा अनर्थकशशशृङ्गादीनां प्रातिपदिकसंज्ञार्थं समासग्रहणस्य विध्यर्थत्वसम्भवेन भाष्याभिमतनियमार्थत्वानुपपत्तिरिति वाच्यम्, अर्थशब्देनाभिधेयस्य ग्रहणे

अभावस्याप्यभिधेयत्वात्, बुद्धिविषयाभिधेयस्य ग्रहणेन शशशृङ्गादि शब्दानामपि बौद्धार्थस्य सत्त्वात्। बहि: सत्ताविशिष्टस्यैवार्थस्य शब्दवाच्यत्वे 'घटोऽस्ति, घटो नास्ति' इति प्रयोगो न स्यात् सत्ताविशिष्टस्यैव घटशब्दवाच्यत्वादस्तीत्यनेन पौनरुक्त्यापत्ते:, सत्ताविशिष्टस्य घटस्य नास्तीत्यनेन विरोधाञ्च। बुदिसतोऽर्थस्य वाच्यत्वे तु बहि: सत्ताबोधनाय अस्तीत्यस्य सार्थक्यम्, बहिरभावबोधनाय 'नास्ति' इत्यस्यापि सार्थक्यम्। तस्माद् बौद्ध एव शब्दो वाचक:, बौद्ध एवार्थो वाच्यश्चेति न काप्यनुपपत्ति:। एवमेव 'अपाक्षीत्' 'पक्ष्यति' 'अस्य सूत्रस्य शाटकं वय' इत्यादौ बुद्ध्युपारूढ एव पच्यादीनामर्थो न तु शब्दप्रयोगकाले बहि: सत्तावान्।

अत्र लाघवात् 'अर्थ्यधातु:' इति नोक्तम् 'अर्थाच्चासन्निहिते' इत्यनेन असन्निहितधन-वाचिनोऽर्थशब्दादिनेर्विधानात्। अर्थशब्दयो: सदा सन्निहितत्वेन इनेरप्राप्ते:। सन्निहितत्वञ्च कालकृतम्। यस्मिन्काले यस्यार्थो नास्ति सोऽर्थीत्युच्यते यस्य तु सन्निहितोऽर्थ: सोऽर्थवान् इत्युच्यते। तदुक्तं भाष्ये—'असन्निहिते इति किमर्थम् 'अर्थवान्' इति। 'धान्यार्थी' इत्यादाय भाष्ये 'यदि हि पुनरयमर्थवयतेर्णिनि: स्यादेवमपि क्रियामेव कुर्वाणे स्यात्। तूष्णीमासीनो य: सोऽपि 'अर्थी अयमनेनेति। एवं तर्हि अयमर्थशब्दोऽस्त्येव द्रव्यपदार्थक:। तद्यथा 'अर्थवानयं देश इत्युच्यते। यस्मिन् गाव: सस्यानि न वर्तन्ते। अस्ति क्रियापदार्थको भावसाधन:। अर्थनमर्थ इति। तद्य: क्रियापदार्थकस्तस्येदं ग'हणम्। इदं पदेन 'अर्थी अयमनेनेति' पूर्वोक्तस्य ग्रहणम्। एवञ्च कृत्वा 'अर्थिकप्रत्यर्थिकावपि सिद्धौ।

अत्र कैयट:— क्रि यापदार्थकत्वे 'अत इन्ठनौ' इति प्रत्ययद्वयं सिध्यति। मतुप्तु क्रियापदार्थकादनभिधानान्न भवति। धनवाचिनोऽप्यूनभिधानात्सन्निहिते इन्ठनोरभाव:। विद्यार्थी-त्यादिशब्दास्तु विद्यामर्थयन्ते इत्यर्थे णिन्यन्ता एव। 'अर्थवानयं देश:' इत्यत्र 'यस्मिन् गाव: सस्यानि च वर्त्तन्ते' इति भाष्योक्त्यया प्रयोगकाले तात्पर्य्यविषयीभूतसम्बन्धेनार्थविशिष्टत्वं सन्निहितत्वं प्रतीयते। उपलब्धविषयिका इच्छा न भवतीति। स्वविषयकेच्छावत्त्वसम्बन्धेना-र्थाविशिष्टेऽर्थे अर्थशब्दादिनिरिति फलति। प्रयोजनवचनादर्थशब्दादिनिरिति मिश्रीक्तिस्तु भाष्यविरुद्ध-त्वादुपेक्ष्या।

अत्र सूत्रे वृत्त्या अर्थविषयकबोधजनकत्वरूपमर्थवत्त्वम्। अत एव 'हरिषु' इत्यादौ प्रत्ययस्य प्रातिपदिकत्ववारणाय अर्थवत्सूत्रे पाणिनिना 'अप्रत्यय:' इति पर्य्युदास: कृत:। 'कृत्तद्धित' इति सूत्रे च एकार्थीभावेन लौकिकप्रयोगे प्रसिद्धत्वरूपमर्थवत्त्वम्। अत एव 'कृत्तद्धिवान्तश्चैवार्थकन्न केवला: कृतस्तद्धिता वा' इति भाष्ये, 'धात्वादीनां विशुद्धानां

लौकिकोऽर्थो न विद्यते। कृत्तद्धि-तानामर्थश्च केवलामलौकिक:' इति वाक्यपदीये चोक्तमिति प्राञ्च:। एकार्थीभावश्च कृत्तद्धितसमासै-कशेषधातुरूपासु पञ्चसु वृत्तिषु शक्तिविशेष:।

अत्र मते अर्थवत्त्वद्वये अर्थवत्पदस्य शक्तिद्वयम्, उपस्थितिद्वयम्, शाब्दबोधद्वयम्, शब्दाधिकार:, विभिन्नयोग्यतादिरूपकारणाधिक्यञ्चेति गौरवं सत्वा नवीना आहु:— सूत्रद्वयसाधारण-मेकमेवार्थवत्त्वम्। तच्च 'एतत्संज्ञाफलभूतविभक्तीतरसमभिव्राहारानपेक्षया लोकेऽर्थविषयकबोध-जनकत्वरूपम्। एतच्च न केवलप्रत्यये प्रातिपदिकसंज्ञाफल-भूतविभक्तीतरप्रकृति-समभिव्याहारापेक्षयैव लोकेऽर्थविषकबोधजनकत्वादिति 'हरिषु' इत्यादौ सो: प्रातिपदिकत्वाप्राप्त्या तद्वारणाय 'अप्रत्यय:' इति पर्य्युदासो न कर्तव्य इत्यपि लाघवम्। तथा चैतन्मते यद्यपि अर्थवत्त्वं स्वरूपतो गुरुभूतं तथाऽपि अर्थवत्पदनिष्ठा एकैव शक्ति-रुभयसूत्रशाब्दबोधप्रयोजिका, उपस्थितिरप्यैकैव, अर्थाधिकारश्चेति न अर्थभेदेन शब्दभेद:। अत्र विभक्तिपदं प्रत्ययपरम्। तेन खट्व, पकिशब्दादीनां विभक्तीतरस्य टाप:, मपश्च समभिव्याहारेण बोधजनकत्वेऽपि न क्षति:।

अन्ये तु प्राचीनमतेऽपि सूत्रद्वयसाधारणम् 'वृत्तिमत्त्वमेवार्थवत्त्वम्। एतन्मतेऽपि 'हरिषु' इत्यादौ प्रत्ययार्थे लिङ्गसंख्याद्ययोगेन स्वादेरप्राप्त्या फलाभावात्संज्ञाया अप्रवृत्ते:। औत्सर्गिकैक-वचनस्यापि 'एकवचनम्' इति महासंज्ञाकरणेन एकत्वसत्त्वे एव प्रवर्त्तमानस्य तदभावे प्रमाणसत्त्वे एव प्रवृत्ते:। यथा अव्ययेभ्य एकवचनोत्पत्तौ 'अव्ययादाप्सुप:' इति सूत्रं लिङ्गम्। विभक्ते: स्वाद्युत्पत्तौ तु न किञ्चिल्लिङ्गम् । तथा च 'अप्रत्यय:' इति पर्य्युदासोऽत्र मतेऽपि न कार्य्य:।[2]

ऋधातोस्थन्प्रत्यये अर्य्यते=प्राप्यते य: सोऽर्थ:। अर्थशब्दस्य नानार्थकत्वेूपि शब्दानां बोध्य एवेहार्थपदेन गृह्यते, व्याख्यानात्।

अर्थवत्किं 'धनं वनम्' इत्यादौ प्रतिवर्णं संज्ञा मा भूत्। यदि व्युत्पत्तिपक्ष: अधातुरित्यस्य अप्रत्यय इत्यस्नू च धात्ववयवभिन्नम्, प्रत्ययावयवभिन्नमित्यर्थश्च आश्रीयते तदा धनाद्यवयवानां धातुप्रत्ययान्यतरावयवत्वेन न वर्णानां प्रातिपदिकसंज्ञेत्युच्यते। यद्वा वर्णे संख्या-द्ययोगात्स्वाद्यप्राप्ति:।

किञ्च प्रतिवर्णं प्रातिपदिकत्वेऽपि वृक्षप्रचलनन्यायेन स्वादिघटितस्य समुदायस्यापि प्रातिपदकत्वे सुपो लुकि प्रतिवर्णं स्वादिश्रवणं तु न दोष:। औत्सर्गिकैकवचनन्तु सत्येव गमके तदा 'षडपूपा दशदाडिमानि कुण्डमजाजिनम्' इत्यादिर्निरर्थको यस्समुदायस्तस्य संज्ञावारणार्थमर्थवद्ग्रहणम्। समुदायस्य प्रातिपदिकत्वे तदवयवस्य सुपो लुक् नलोपादिश्च स्यात्।[3]

यदि तु 'अधातु:, अप्रत्यय:' इति पर्य्युदासेनार्थवत्त्वलाभ इत्युच्यते तदा अर्थवत्त्वग्रहणमुत्तरार्थम्। न चोत्तरत्रापि कृत्तद्धितादीनामर्थवत्त्वाव्यभिचारादनुवृत्तिर्व्यर्थेति वाच्यम्, अर्थवद्ग्रहणनुवृत्तिसामर्थ्येन संज्ञाविधाविति निषेधं बाधित्ववात्तदन्तविधेरेव फलत्वात्।

न च ज्ञापकसाजात्याद्यत्र संज्ञानिष्ठविधेयतानिरुपिता यत्र साक्षात् प्रत्ययनिष्ठोद्देश्यता तत्रैव निषेधप्रवृत्तिरिति वाच्यम्, कृदाद्यभिन्नं यदर्थवत्तत्प्रातिपदिकमित्यर्थसम्पादना- यैवानुवृत्तेरावश्यकत्वात्। पर्य्युदासस्यानित्यज्ञापनार्थं तु नार्थवद्ग्रहणम्, अनित्यत्वे भाष्यसम्मतदृढतरफलाभावात्। अन्ये त्वर्थवत्त्वम् उभयत्रापि वृत्त्या अर्थविषयकबोधजनकत्वमेव। वृत्तिश्च शक्तिलक्षणाव्यञ्जनान्य-तमरूपा। लक्षणया वृत्तिमत्त्वस्य 'गोपी' इत्युदाहरणम्। अत्र हि गोपत्वारोपेण गोपशब्द: स्त्रियां वर्तते। व्यञ्जनया वृत्तिमत्त्वं चादिनिपातानाम्।

अत एव भाष्ये 'अर्थवदिति व्यपदेशाय वर्णानां मा भूत्' इत्युक्तं न तु प्रत्यस्य मा भूदिति। न चोक्तार्थवत्त्वस्वीकारे प्रत्ययपर्य्युदासकरणापत्ति:, फलाभावेनैव तत्र प्रातिपदिकत्वाप्रवृत्ते:। न च 'हरिषु' इत्यादावौत्सर्गिकैकवचने तस्य श्रवणं फलम्, सं'याद्यभावे सति गमके एव तत्प्रवृत्ते:। न चैवं प्रतिवर्णं विभक्त्यनुत्पत्तै अर्थवदिति व्यर्थम्, 'निपातस्थानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या' इति भाष्णेण अनर्थकप्रातिपदिकादेकवचनोत्पत्त्यभ्यनुज्ञानात्।[4]

## सन्दर्भ:—

1. अष्टाध्यायी 1.2.45
2. सिद्धान्तकौमुदी, लक्ष्मीटीका, पृ. 245-246
3. सिद्धान्तकौमुदी, लक्ष्मीटीका, पृ. 247
4. सिद्धान्तकौमुदी, लक्ष्मीटीका, पृ. 247

## सन्दर्भिका:

1. वैयाकरणसिद्धान्तकौमुदी——भट्टोजिदीक्षित, लक्ष्मीटीका 1-2, सभापति-शर्मोपाध्याय; मोतीलाल बनारसीदास, वाराणसी
2. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा तत्त्वबोधिनी सहित, वासुदेव दीक्षित-ज्ञानेन्द्रसरस्वती)——भट्टोजिदीक्षित, वाराणसी, 1979
3. वैयाकरणसिद्धान्तमञ्जूषा——नागेशभट्ट, वाराणसी——1977

4. वैयाकरणसिद्धान्तलघुमञ्जूषा——नागेशभट्ट, वाराणसी——1977
5. वैयाकरणसिद्धान्तपरमलघुमञ्जूषा——नागेशभट्ट, वाराणसी——1977
6. श्र वैयाकरणसिद्धान्तकौमुदी, भाग प्रथम——भट्टोजिदीक्षित (सं. गोपालदत्त पाण्डेय), चौखम्बा विद्या भवन, वाराणसी——1997
7. वैयाकरणसिद्धान्तकौमुदी, लघुमञ्जूषा——नागेशभट्ट वाराणसी-1924
8. वैयाकरणभूषणसारः——कौण्डभट्ट, बनारस——1934
9. व्याकरणे नागेशभट्टकृतिषु तन्त्रस्य प्रभावः——डॉ. राजनाथ त्रिपाठी, विश्वविद्यालय प्रकाशन, वाराणसी
10. व्याकरण की दार्शनिक भूमिका——डॉ. सत्यकाम वर्मा——1971
11. व्याकरण दर्शन भूमिका——रामाज्ञा पाण्डेय, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी——1971
12. व्याकरणमहाभाष्यम् (नवाि◌ेकं)——पतञ्जलिः (अनुवादक-चारुदेव शास्त्री), मोतीलाल बनारसीदास, वाराणसी——1999
13. व्याकरणमहाभाष्यम् (प्रदीपोद्द्योत सहित)——पतञ्जलि, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली
14. व्याकरणशास्त्र का इतिहास, भाग-द्वितीय——पण्डित युधिष्ठिर मीमांसक, सोनीपत——1984
15. शब्दकौस्तुभ, भाग-प्रथम——भट्टोजिदीक्षित, चौखम्बा संस्कृत सीरीज, वाराणसी ——1991
16. शब्दकौस्तुभ, भाग-द्वितीय——भट्टोजिदीक्षित, चौखम्बा संस्कृत सीरीज, वाराणसी ——1991
17. शिशुपालवधम्——माघ, चौखम्बा सुरभारती प्रकाशन, वाराणसी——1991
18. श्रीमद्भगवद्गीता——गीता प्रेस, गोरखपुर
19. संस्कृतव्याकरणशास्त्र का इतिहास——युधिष्ठिर मीमांसक, सोनीपत——1984
20. संस्कृत व्याकरण का उद्भव एवं विकास——डॉ. सत्यकाम वर्मा, प्र.सं. 1971

21. संस्कृत साहित्य का इतिहास——वाचस्पति गैरोला, चौखम्बा वाराणसी—1985

22. संस्कृत शास्त्रों का इतिहास——बलदेव उपाध्याय, शारदामन्दिर, दुर्गीकुण्ड, वाराणसी, प्र.सं. 1969

23. Bhattoji Dikhita : His Contribution to Sanskrit Grammer-by Dr. Suryakanta Bali.